# आचार्यविज्ञानभिक्षोः अधिष्ठानकारणवादस्य पर्यालोचनम्

पूर्णचन्द्रमण्डलः

प्रबन्धसारः

मानवजीवनस्य परमपुरुषार्थो भवति मोक्षः मुक्तिः वा। अयं मोक्षः भारतीयाध्यात्मिकदर्शनसम्प्रदायानां मूलालोचनायाः विषयः। प्रमाणगत-प्रमेयगत-कार्यकारणवादप्रभृतिविषये भारतीयदर्शनसम्प्रदायेषु मतवैषम्ये अपि परमपुरुषार्थमोक्षविषये समन्वयः लक्ष्यते। षोडशशताब्द्यां समन्वयवादी आचार्यः विज्ञानभिक्षुः अस्य समन्वयवादस्य मार्गमधिकतरं प्रशस्तीकृतवान्। स सांख्ययोगवेदान्तन्यायदर्शनानां प्रतिपाद्यसिद्धान्तविषये विरोधं न प्रदश्य समन्वयं स्थापितवान्। तेन सांख्यवेदान्तयोः समन्वये यत् नैपुण्यं प्रदर्शितं तत् तत्प्रवर्तिताधिष्ठानकारणवादे प्रस्फुटितं जातम्। सः अधिष्ठानकारणवादशब्दः आश्रयार्थे स्वीकृतवान्। वेदान्तदर्शने जगतः उत्पत्तौ उपादानकारणत्वेन निमित्तकारणत्वेन ब्रह्मणः स्वीकारेऽपि आचार्यः विज्ञानभिक्षुः ब्रह्म उपादानकारणत्वेन निमित्तकारणत्वेन वा न स्वीकृतवान्। स निमित्तकारणरूपेण ईश्वरस्य अस्तित्वं स्वीकृतवान्, प्रकृतिं जगत उपादानकारणरूपेण ब्रह्म जगतः अधिष्ठानरूपेण च प्रतिपादितवान्। आचार्यः विज्ञानभिक्षुः विभिन्नदार्शनिकमतवादेषु समन्वयनिमित्तं जीवः, जगतः ब्रह्मणः च कार्यकारणसम्पर्कम् अधिष्ठानरूपेण किञ्च तेषां सम्बन्धम् अविभागसम्बन्धरूपेण वर्णितवान्। अयम् अविभागसम्बन्ध एव तस्य दार्शनिकमतवादस्य मूलभित्तिः प्रधानवैशिष्ट्यं च।

विशिष्टशब्दाः- अधिष्ठानं, कारणं, ब्रह्म, जगत् प्रकृतिश्च।

## भूमिका

भारतीयदर्शनसाहित्ये समन्वयवादिदार्शनिकरूपेण अतिप्रसिद्धः परिचितनाम च भवति आचार्यविज्ञानभिक्षुः। विभिन्नविदुषः तस्य समयकालं पञ्चदशशताब्दीं स्वीकृतवन्तः। तेन रचिताः प्रसिद्धाः ग्रन्थाः विज्ञानामृतभाष्यम्, सांख्यप्रवचनभाष्यम्, सांख्यसारः, योगवार्तिकम्, योगसारसंग्रहः प्रभृतयः।

सांख्यप्रवचनभाष्यादिग्रन्थेषु सांख्यसिद्धान्तानाम् आलोचनाप्रसङ्गे स स्वदृष्टिभङ्गिद्वारा सांख्यमतान् प्रतिपादितवान्। सांख्यप्रवचनभाष्ये पुराणात् स्मृतेः श्रूतेः च विविधप्रमाणान् उल्लेखपूर्वकं स सांख्यवेदान्तयोः विरुद्धमतवादेषु सामञ्जस्यं विधातुं प्रयासी अभवत्। साधारणतः सांख्यदर्शनसम्मतकार्यकारणविषयकमतवादः सत्कार्यवादनाम्ना प्रसिद्धः। सांख्यमते उत्पत्तेः पूर्वं कार्यम् असत् नास्ति, तदा कार्यं प्रच्छन्नरूपेण अव्यक्तरूपेण वा तिष्ठति किञ्च कार्यं व्यापारात् परं कार्यरूपेण अभिव्यक्तं भवति। अपरपार्श्वे अद्वैतवेदान्तदर्शनस्य कार्यकारणविषयकसिद्धान्तः विवर्तवादनाम्ना प्रसिद्धः। अद्वैतवेदान्तदर्शनस्य मते कारणं सत्, कार्यं मिथ्या च। दृश्यमानमिदं जगत् मिथ्या, अस्य जगतः अधिष्ठानं ब्रह्म एकमात्रं सत्यम्। यथा रज्ज्वौ सर्पः दृश्यते तद्वत् ब्रह्माधिष्ठाने जगत् प्रतिभासते। अस्य जगतः ब्रह्मणः विवर्तः अर्थात् कापि पारमार्थिकसत्ता नास्ति। किन्तु आचार्यविज्ञानभिक्षुः सांख्यवेदान्तयोः एतेषु कार्यकारणविषयकविरुद्धमतवादेषु समन्वयसाधनोद्देश्येन अधिष्ठानकारणवादं प्रतिष्ठापितवान्। किञ्च बादरायणव्यासरचितब्रह्मसूत्रनामकग्रन्थस्य उपरि तस्य रचितविज्ञानामृतनामकभाष्ये जन्माद्यस्य यतः इति सूत्रभाष्यरचनाकाले सः अधिष्ठानकारणवादस्य प्रसङ्गम् उत्थापितवान्।

आचार्यः विज्ञानभिक्षुः तस्य विज्ञानामृतभाष्ये अवदत् यत् जन्म, स्थितिः, वृद्धिः, विपरिणामः, ह्रासः विनाशश्च - जगतः एतेषां षण्णाम् अवस्थानाम् उत्पत्तिः ब्रह्मणः भवति। किन्तु तेन ब्रह्मणः जगतः उत्पत्तिस्वीकारे अपि ब्रह्म जगतः उपादानकारणत्वेन निमित्तकारणरूपेण वा न स्वीकृतम्। तस्य मते जगतः उपादानकारणं प्रकृतिः। निमित्तकारणरूपेण तेन ईश्वरस्य अस्तित्वं कल्पितम्। ब्रह्म च जगतः अधिष्ठानकारणरूपेण प्रतिपादितम्। अत्र सः अधिष्ठानकारणशब्दः आधारार्थे स्वीकृतवान्। अधिष्ठानकारणसंज्ञाप्रदानप्रसङ्गे आचार्यविज्ञानभिक्षुः अवदत् यत्र उपादानकारणम् अभिव्यक्तरूपेण तिष्ठति किञ्च येन उपष्टब्धः सन् कार्याकारेण परिणतं भवति तत् अधिष्ठानकारणम्। उपष्टब्धशब्दः अत्र विधृतार्थे प्रयुक्तः। तस्य मते प्रकृतिः ब्रह्मणि अविभक्तरूपेण तिष्ठति किञ्च तेन विधृतं सत् जगद्रूपकार्ये परिणतं भवति। यथा सृष्टेः आदौ पृथिव्याः उपादानानि सूक्ष्मावस्थायां मिश्रितानि भवन्ति किञ्च जलेन विधृतं भूत्वा परवर्तीकाले पृथिवीरूपेण परिणतिं लभते। अस्मिन् अर्थे जलं

पृथिव्या: अधिष्ठानकारणम्। जलस्य शक्तिरेव पृथिवीं सृजति। किन्तु जलस्य कोऽपि विकारो न उत्पद्यते। तद्रूपाधिष्ठानब्रह्मण: प्रकृते: जगद्रूपेण परिणतत्वे अपि अत्र ब्रह्मण: कोऽपि विकारो न परिलक्ष्यते।[1] आचार्यविज्ञानभिक्षो: मते उपादानकारणं द्विविधम्- अधिकार्युपादानकारणम् विकार्युपादानकारणम्। अत्र उपादानशब्द: सामान्यार्थे व्यवहृतवान्। यतो हि ब्रह्मरूपाधारात् प्रकृति: कार्यरूपजगति परिणमते तस्मात् ब्रह्मण: अधिकारित्वं किञ्च चिन्मात्रसत्त्वे अपि उपादानकारणरूपेण व्यवह्रियते।[2]

सांख्यसारग्रन्थे अपि आचार्यविज्ञानभिक्षु: आत्मानं प्रकृते: आधारत्वात् उपादानकारणरूपेण वर्णितवान्।[3] अस्मिन् स्थले स जलपृथिव्यो: उदाहरणोपस्थापकपूर्वकं अवदत् पृथ्वी जलमाश्रित्य तिष्ठति इत्यत: जलं पृथिव्या उपादानकारणम्। तद्वत् समस्तपदार्था: चैतन्यमाश्रित्य तिष्ठन्ति इत्यत: कूटस्थनित्याविकारिचैतन्यस्वरूपं ब्रह्म जगत: उपादानकारणम् इति कथ्यते।[4] विज्ञानभिक्षो: मते अधिष्ठानकारणे जीवस्य जगत: च लयप्राप्तावस्थायाम् अथवा अव्यक्तावस्थायामपि प्रकृति: सत्या नित्या च। अपरपार्श्वे जीव: अधिष्ठानब्रह्म च उभौ चिन्मात्रौ इति उक्तम्, तयो: पार्थक्यमपि उक्तम्। साधारणजीव: क्लेशादिद्वारा सम्पृक्त: किन्तु ब्रह्म सर्वेषाम् ऊर्द्ध्वे। एकेन उदाहरणेन विज्ञानभिक्षु: तस्य वक्तव्ये स्पष्टतया उक्तवान् आकाशस्य मध्ये वायु:, जलस्य च मध्ये पृथ्वी तिष्ठत:। तद्रूपब्रह्मचैतन्यस्य मध्ये क्लेशादिक्लिष्टजीवचैतन्यं तिष्ठति। स बोधयितुम् ऐच्छत् यत् ब्रह्म आधाररूपेण जीवं धारयति। तस्मात् तस्य मते जीवजगद्भ्यां ब्रह्मण: सम्पर्क: केवलम् अधिष्ठानकारणरूपेण न तु मृत्तिकाघटयो: इव उपादानकारणरूपेण।

अद्वैतवेदान्तदर्शनस्य मते ब्रह्म एव जगत: निमित्तकारणम् उपादानकारणं च। यथा लूता स्वदेहनि:सृततन्तुकार्यं प्रति उपादानकारणं निमित्तकारणं च, तद्वत् विश्वप्रपञ्चस्य उपादानकारणं निमित्तकारणं च ब्रह्म। कारणं समस्तकार्याणि सत्स्वरूपब्रह्मभिन्नं न भवन्ति। श्रुतिद्वारा अद्वैतवेदान्ते अयं विषय: प्रतिष्ठापित:। अत्र वस्तुनि अनुस्यूतं नाम यत् उपादानकारणं, वस्तुन: अवस्थिते: आधाररूपेण तदेव निमित्तकारणम्। किन्तु पारमार्थिकदृष्ट्या मृत्तिका कुम्भकारश्च सत्स्वरूपब्रह्मभिन्नं नास्ति इत्यत: केवलं ब्रह्म एव समग्रकारणत्वेन निर्धार्यते। अत:

पारमार्थिकतत्त्वविचारेण ब्रह्म एकम् अद्वितीयं च इति सिद्धत्वात् ब्रह्म एव उपादानकारणं निमित्तकारणं च। ब्रह्म उभयरूपेण अर्थात् उपादानरूपेण निमित्तरूपेण च जगत: कारणं तत् प्रतिपादयितुं आचार्यबादरायण: ब्रह्मसूत्रे 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्', 'अधिध्योपदेशाच्च' इत्यादिसूत्राणि अरचयत्। आचार्यशङ्कर: ब्रह्मसूत्रस्य शारीरिकमीमांसकभाष्ये स्पष्टतया ब्रह्मण: उपादानत्वं निमित्तकारणत्वं च प्रतिष्ठापितवान्। विज्ञानभिक्षुणा अद्वैतवेदान्तमतमिव अधिष्ठानार्थे ब्रह्म अधिकार्युपादानकारणरूपेण स्वीकृतम्। सांख्यदर्शने पुरुष: कदापि उपादानकारणरूपेण न अभिधीयते। विज्ञानभिक्षु: सांख्यानुसृतपरिणामवादं परित्यज्य वेदान्तदृष्टिभङ्गिं स्वीकृतवान्। किन्तु ब्रह्म जीवजगतो: अधिष्ठानस्वीकारात् तेन वेदान्तदर्शनस्य विवर्तवाद: सम्पूर्णरूपेण न स्वीकृत:। केवलं ब्रह्मण: निर्विकारकूटस्थनित्यचैतन्यस्वरूपत्वस्य परिचयप्रदानप्रसङ्गे स विवर्तवादस्य लक्षणं स्वीकृतवान्, किन्तु विवर्तवाद इव कार्यजगत् मिथ्यारूपेण न अङ्गीकृतवान्।

आचार्यविज्ञानभिक्षु: न्यायदर्शनसम्मतसमवाय्यसमवायिनिमित्तकारणेभ्य: भिन्नं चतुर्थकारणरूपेण अधिष्ठानकारणं स्वीकृतवान्। अधिष्ठानकारणलक्षणप्रसङ्गे अवदत् यत्र कार्यकारणे अविभागविभागौ इति उभयविधसम्बन्ध: वर्तते तत् अधिष्ठानकारणम्।[5] यतो हि समवायिकारणासमवायिकारणनिमित्तकारणेषु अधिष्ठानकारणं न अन्तर्भवति। स: अस्मिन् विषये युक्तिपूर्वकम् अवदत् अधिष्ठानकारणं समवायिकारणं नास्ति, कारणं न्यायदर्शनानुसारं यत् समवेतात् कार्यमुत्पद्यते तत् समवायिकारणम्।[6] किन्तु स उक्तार्थे आधारस्वरूपब्रह्म उपादानकारणं न उक्तवान्। स प्रकृतिं समवायिरूपेण विकार्युपादानकारणरूपेण वा स्वीकृतवान्।[7] पुनश्च ब्रह्म असमवायिकारणरूपेण अपि न परिगण्यते। न्यायमते यत् समवायिकारणे समवेतं सत् कार्यं प्रति कारणं भवति तत् असमवायिकारणम्।[8] किन्तु तस्य मते प्रकृति: ब्रह्मणि अधिष्ठिता, किञ्च ब्रह्म एव आधाररूपेण प्रकृतिं धारयति। तस्मात् ब्रह्म असमवायिकारणमपि नास्ति। पुनश्च न्यायमते समवायिकारणासमवायिकारणभिन्नं कारणं निमित्तकारणम्।[9] अस्मिन् अर्थे अधिष्ठानकारणवादेन सह न्यायवैशेषिकसांख्यमतानां कोऽपि विरोध: नास्ति। कारणं ते अधिष्ठानकारणस्य निमित्तकारणतां स्वीकुर्वन्ति। विज्ञानभिक्षो: मते नैयायिका:

यथा निमित्तकारणरूपेण ईश्वरं परिकल्पितवन्तः तत् ब्रह्मणः अधिष्ठानकारणवादस्य नामान्तरवादमात्रम्। अत एव तेन चतुर्थकारणरूपेण अधिष्ठानकारणवादस्वीकारे अपि न्यायवैशेषिकमतेन सह तस्य मतविरोधः न जायते।[10] अस्मिन् विषये आचार्यविज्ञानभिक्षुः अपि समन्वयस्य मनोभावं प्रकटयति स्म।

एवम् अधिष्ठानकारणवादेन सह ब्रह्मणः उपादानकारणत्वमपि सिध्यति। कारणं ब्रह्मणः अविभक्तः सन् उपष्टब्धो भूत्वा प्रकृत्यादिकार्यरूपेण परिणमते। सिद्धान्तोऽयं वैशेषिकसांख्ययोः अविरोधी। वैशेषिकाः ब्रह्म निमित्तकारणं कथयन्ति। किन्तु आचार्यविज्ञानभिक्षुदृष्ट्या ब्रह्म समवाय्यसमवायिभ्यामुदासीनं निमित्तकारणात् विलक्षणतया चतुर्थम् आधारकारणम् अधिष्ठानकारणं वा।[11] एवम् अन्तर्लीनपरिणामिशक्तिः प्रकृतिसामर्थ्यद्वारा ब्रह्मणः उपादानकारणतां सिध्यति। जगतः कर्तृत्वमपि ब्रह्मणि अस्ति। कर्तृत्वमिदं ब्रह्मणः उपाधिभूतशुद्धसत्तामायायाः सामर्थ्यद्वारा सिध्यति। इयं माया अपरिणामिनी। विज्ञानभिक्षुदृष्ट्या कर्तृत्वमपि एकं निमित्तकारणत्वम्।[12] उक्तरूपे ब्रह्म जगतः उपादानकारणत्वात् कर्तृत्वात् च निमित्तकारणम्। अत एव ब्रह्म जगतः अभिन्ननिमित्तोपादानकारणम्।[13]

आचार्यविज्ञानभिक्षोः उक्ताभिमतस्य विरुद्धे आपत्तिः उत्पत्स्येत यत् न्याये वैशेषिकदर्शने च यस्मिन् अर्थे ईश्वरस्य निमित्तकारणत्वं स्वीकृतं, स तस्मिन् अर्थे ब्रह्म निमित्तकारणरूपेण न स्वीकृतवान्। तस्य मते ब्रह्म जीवस्य नियन्ता नास्ति। अत्र ब्रह्म अधिष्ठानकारणम् अर्थात् यत्र उपादानकारणम् अविभक्तरूपेण स्थित्वा कार्याकारेण परिणमते। चित्स्वरूपं ब्रह्म भवति अधिकारिणी, निर्गुणं निष्क्रियं च। तस्मात् कस्मिन् अपि सृष्टिकार्यपरिचालनारूपवैशिष्ट्यब्रह्मणि परिलक्षणं न सम्भवम्। अत एव विज्ञानभिक्षोः प्रतिपादिताधिष्ठानस्वरूपब्रह्म न्यायदर्शनानुसारं निमित्तकारणं न उक्तम्। किन्तु अनया आपत्त्या समन्वयवादिविज्ञानभिक्षोः अधिष्ठानकारणवादस्थापने कापि समस्या न भवति। यतो हि वैशेषिकसम्मतनिमित्तकारणेन सह अधिष्ठानकारणवादस्य कोऽपि विरोधः नास्ति - एवं तेन स्वीकृतम्। किन्तु निमित्तकारणम् अधिष्ठानकारणं च एकमेव इति प्रतिपादनचेष्टा तेन कदापि न विहिता।

विज्ञानभिक्षोः मते सृष्टेः पूर्वं प्रकृतिपुरुषयोः आधारः ब्रह्मणि लयावस्थायां

तिष्ठति। अस्याम् अवस्थायां प्रकृतिपुरुषयोः ब्रह्मणा सह अविभक्तरूपेण सत्त्वात् ब्रह्म इव प्रकृतिः पुरुषश्च नित्यौ। पुनश्च यदा प्रकृतिः पुरुषश्च व्यक्तौ भवतः तदापि नित्यौ स्तः। कारणं प्रलयकाले प्रकृतिः पुरुषश्च पुनश्च आधारस्वरूपब्रह्मणि एकीभूतौ भवतः। अत एव तौ कदापि अनित्यौ न। ब्रह्म अधिष्ठानरूपे सर्वदैव अव्याकृतं विद्यते। किञ्च ब्रह्मणि आश्रितप्रकृतेः परिणामो भवति। किन्तु ब्रह्म सर्वप्रकारपरिणामस्य ऊर्द्ध्वे तिष्ठति। विज्ञानभिक्षुणा एवं सांख्योक्तपरिणामवाद इव प्रकृतेः अचेतनस्य वा नित्यत्वं रक्षितम्। अपरपार्श्वे विवर्तवाद इव आधारस्वरूपब्रह्मणः निर्विकारत्वं प्रतिपादितम्। तस्मात् आचार्यविज्ञानभिक्षोः कार्यकारणवादः परिणामवादः न कथ्यते, विवर्तवादः अपि न उच्यते। पुनश्च अयं सम्बन्धः आधाराधेयसम्बन्धरूपेणापि न अभिधीयते। कारणं साधारणतया आधाराधेयसम्बन्धेन उभयोः पृथक्कर्तुं शक्यते किन्तु अधिष्ठानकारणे अर्थात् ब्रह्मणि जीवः जगच्च अव्यक्तावस्थायाम् अविभक्तरूपेण वर्तेते। अनुरूपतया अयं सम्बन्धः समवायसम्बन्धः अपि न उच्यते समवायसम्बन्धस्य नित्यसम्बन्धत्वात्। किन्तु विज्ञानभिक्षोः मते जीवजगतोः अव्यक्तावस्थायाम् ब्रह्मणा सह अविभक्तत्वे अपि परं व्यक्तावस्थायां विभक्तरूपेण तिष्ठतः।

उपसंहारः

आचार्यविज्ञानभिक्षोः समन्वयवादिदर्शनचिन्तायाः मूलभित्तिर्भवति अधिष्ठानकारणवादः। स तस्य प्रतिपादिताधिष्ठानकारणं यथा वेदान्तदर्शनसम्मतब्रह्म इव एकरूपेण अद्वितीयरूपेण च प्रतिष्ठापितवान्। अनुरूपतया तस्य अधिष्ठानकारणवादे सांख्यसम्मतप्रकृतिः पुरुषश्च एते द्वे तत्त्वे उपस्थापितवान्। तस्य मते उक्ताधिष्ठानकारणे निर्गुणब्रह्मेश्वरपुरुषप्रकृतिप्रभृतीनि तत्त्वानि अविभक्तरूपेण विद्यन्ते। तेन सृष्टिप्रसङ्गे यथा ब्रह्मणः अस्तित्वं स्वीकृतं तथैव सगुणब्रह्म विहाय निर्गुणब्रह्म अपि स्वीकृतम्। उभयमतविरोधपरिहाराय स अधिष्ठानकारणरूपम् एकं चरमतत्त्वं स्थापितवान्। आचार्यशङ्करस्य निर्गुणं ब्रह्म, आचार्यरामानुजस्य च सगुणब्रह्म उभयमेव अविभक्तरूपेण वर्तेते। तस्य मते यत् तत्त्वं यदा निर्गुणरूपेण विवेच्यते तदा ब्रह्म, पुनश्च यदा तदेव तत्त्वं सगुणरूपेण गृह्यते तदा ईश्वररूपेण परिगणयितुं शक्यते।

## आचार्यविज्ञानभिक्षुः

तस्य भाष्ये विभिन्नाचार्याणां सिद्धान्तेषु दोषम् अप्रदर्श्य मतवादेषु उपादेयांशान् स्वीकृत्य कथं समन्वयः स्यात् इत्येवं प्रचेष्टां विहितवान्। समन्वयस्य उद्देश्येन स विभिन्नमतवादेषु सामञ्जस्यं विधातुं जीवजगतोः ब्रह्मणः च कार्यकारणसम्बन्धम् अधिष्ठानकारणरूपेण किञ्च तेषां सम्बन्धम् अविभागसम्बन्धरूपेण वर्णितवान्। अयम् अविभागसम्बन्ध एव तस्य दार्शनिकमतवादस्य मूलभित्तिः प्रधानवैशिष्ट्यं च। विज्ञानभिक्षोः मते अधिष्ठानकारणस्वीकारे उपनिषदः एकम् अद्वितीयम् इति चरमतत्त्वेन सह कस्यापि आस्तिकमतस्य सामञ्जस्यरक्षणं न कष्टकरम्।

## सन्दर्भाः-

1. तदेवाधिष्ठानकारणं यत्राविभक्तं येनोपष्टब्धं च सदुपादानकारणं कार्याकारेण परिणमते। यथा सर्गादौ जलाविभक्ताः पार्थिवसूक्ष्मांशास्तन्मात्राख्याः जलेनैवोपष्टम्भात् पृथिव्याकारेण परिणमन्त इत्यतो जलं महापृथिव्या अधिष्ठानकारणमिति। (विज्ञानामृतभाष्यम्- १/१/२)
2. अत एव अविकारिचिन्मात्रत्वेऽपि ब्रह्मणो जगदुपादानत्वं जगदभेदश्चोपपद्यते। विकारिकारणवद् अधिष्ठानकारणस्यापि उपादानत्वव्यवहारात्। (विज्ञानामृतभाष्यम् - १/१/२)
3. त्रिगुणात्मकशक्तीनां परिणामैरतश्चिति। आधारविषया विश्वोपादानविकारतः।। सांख्यसारः २/२/३।
4. अतो जगदुपादानमपि ब्रह्माऽविकारतः। कूटस्थनित्यपर्य्यायपरमार्थसदुच्यते।। सांख्यसारः २/२/५।
5. यत्र च कार्यस्य कारणाविभागेनाविभागस्तदधिष्ठानकारणम् (विज्ञानामृतभाष्यम्- १/१/२)
6. यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्। (तर्कसंग्रहः, पृ.- १४१)
7. समवायसम्बन्धेन यत्राविभागस्तद्विकारिकारणम्। (विज्ञानामृतभाष्यम्- १/१/२)
8. कार्येण कारणेन वा सहैकस्मिन् समवेतं सत् कारणमसमवायिकारणम्। (तर्कसंग्रहः, पृ- १४५)
9. तदुभयभिन्नं कारणं निमित्तकारणम्। (तर्कसंग्रहः,पृ.- १४९)
10. संभवत्यविरोधे सृष्टिप्रक्रियां वैशेषिकसांख्ययोरुभयोरप्यत्र विरोधानौचित्यत्यादिति। वैशेषिकादिभिरपीदृशं ब्रह्मणः कारणत्वमिष्यत एव। परं तु तैरिदमपि निमित्तकारणतेति परिभाष्यते। अस्माभिस्तु समवाय्यसमवायिभ्यामुदासीनं निमित्तकारणेभ्यश्च विलक्षणतया चतुर्थमाधारकारणत्वमिति। (विज्ञानामृतभाष्यम् १/१/२)
11. अस्माभिस्तु समवाय्यसमवायिभ्यामुदासीनं निमित्तकारणेभ्यश्च विलक्षणतया चतुर्थमाधारकारणत्वमिति। (विज्ञानामृतभाष्यम्- १/१/२)।

12. ब्रह्मणश्च जगत्कर्तृत्वं स्वोपाधिमायोपाधिकम्, परिणामित्वरूपोपादानत्वं च प्रकृतितत्कार्याद्योपाधिकमपीष्यत एव। (विज्ञानामृतभाष्यम् - १/१ /२)।
13. एतेन जगतोऽभिन्ननिमित्तोपादानत्वं व्याख्यातम् (विज्ञानामृतभाष्यम् - १/१/२)।

## सहायकग्रन्थसूचिः


१. उपाध्यायः, श्रीवलदेवः, संस्कृतवाङ्मयस्य बृहद् इतिहासः(दशमः खण्डः), उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनौ, १९९९॥
२. गोविन्दाचार्यः, तर्कसंग्रहः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २०१५।
३. चक्रवर्ती, लोकनाथः, वेदान्तपरिभाषा, संस्कृतमहाविद्यालयः तथा विश्वविद्यालयः, कलकाता, २०१९।
४. त्रिपाठी, केदारनाथः, ब्रह्मसूत्रविज्ञानामृतभाष्यम्, वानारसहिन्दु-विश्वविद्यालयः, वाराणसी, १९७९।
५. दासः, देवव्रतः, विज्ञानभिक्षोः भारतीयचिन्तायाः वैशिष्ट्यम्, संस्कृतपुस्तकभण्डारः, कलकाता, २००६।
६. भट्टाचार्यः, रामशङ्करः सांख्यसारः, भारतीय-विद्या-प्रकाशनम्, वाराणसी, १९७८।
७. मुसलगाँवकरः, गजाननशास्त्री, सांख्यदर्शनम्, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, २०१९।
८. सेनः, विश्वनाथः, ज्ञानतत्त्वं अधिविद्या च, व्यानार्जी पावलिशार्स्, कलकाता, २०१३।


❋ ❋ ❋